छर्द्दिविघातादश्रुनातियोगात् ॥
दवात्तथाग्न्यग्निशि सेविताच
विण्मूत्रवातक्रमनिग्रहाच्च ।
प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाच्च विपर्य्ययेण
क्लेशाभिघातादतिमैथुनाच्च ।
वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः" ॥
स च चतुर्व्विधः । यथा,—
"वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्व्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥
निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यशिरोऽभितापाः ।
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताक्षिशोथः
कण्डूपदेहावतिशीतता च ।
स्रावो बहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
ताम्राश्रुता लोहितनेत्रता च
राज्यः समन्तादतिलोहिताश्च ।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति" ॥
इति माधवकरः ॥ तस्य चिकित्सा यथा,—
"द्वे पादमध्ये पृथुसन्निवेशे
शिरे गते दे बहुधा हि नेत्रे ।
ताः म्रोक्षणोत्सादनलेपनादीन्
पादप्रयुक्तान्नयनं नयन्ति" ॥
म्रोक्षणं सेचनं । उत्सादनं उद्वर्त्तनं ।
"मलोष्णसंघट्टनपीड़नाद्यै-
स्ता दूषयन्ते नयनानि दुष्टाः ।
भजेन्महावृक्षहितानि तस्मा-
दुपानदभ्यञ्जनधावनानि" ॥
मलं धूल्यादि । मलादिभिर्दुष्टाः ताः शिरानयनानि दूषयन्ते इत्यन्वयः ॥
"चक्षुष्याः शालयो मुद्गा यवा मांसन्तु जाङ्गलं ।
पश्चिमांसं विशेषेण वास्तूकं तण्डुलीयकं ॥
पटोलकर्कोटककारवेल्ल-
फलानि सर्पिःपरिपाचितानि ।
तथैव वार्त्ताकुफलं नवीनं
दृशोर्हितः स्वादु तथापि तिक्तः ॥
कट्वम्लगुरुतीक्ष्णोष्णमाषनिष्पावमैथुनं
मद्यवल्लूरपिण्याकमत्स्यशाकविरूढ़कं ।
विदाहीन्यन्नपानानि न हितान्यक्षिरोगिणः ॥
सेकं आश्चोतनं पिण्डी विड़ालस्तर्पणं तथा ।
पुटपाकोऽञ्जनं चैभिः कल्कैर्नेत्रमुपाचरेत्" ॥ * ॥
कल्कविधिः । तत्र सेकविधिः ।

"सेकस्तु सूक्ष्मधाराभिः सर्व्वस्मिन्नयने हितः ।
मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः ॥
स चापि स्नेहनो वाते पित्ते रक्ते च रोपणः ।
लेखनस्तु कफे कार्य्यस्तस्य मात्रा विधीयते ॥
षड्भिर्वाचां शतैः स्नेहे चतुर्भिस्तैस्तु रोपणे ।
तैस्त्रिभिर्लेखने कार्य्यः सेको नेत्रप्रसादने ॥
निमेषोन्मेषणे पुंसामङ्गुल्याच्छोटिका तथा ।
गुर्व्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः" ॥
छोटिका तुटकी इति लोके ।
"सेकस्तु दिवसे कार्य्यो रात्रौ चात्यन्तिके गदे" ।
स यथा,—
"एरण्डदलमूलत्वक्शृतमाजं पयो हितं ।
सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनं ॥
पथ्याक्षामलखसखसवस्कलकल्केन सूक्ष्मवस्त्रेण ।
कृत्वा पोटलिकां तामहिफेनोत्थद्रवेणार्द्रां ॥
निदधीत लोचने स्यात् सर्व्वाभिष्यन्दसंक्षयः शीघ्रं ।
योगोऽयमश्विभिरुक्तो जगदुपकाराय कारुणिकैः ॥
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
स्नानं कृष्णतिलैश्चापि चक्षुष्यमनिलापहं ।
आमलैः सततं स्नानं परं दृष्टिबलावहं ॥
त्रिफलायाः कषायस्तु धावनान्नेत्ररोगजित् ।
कवलान्मुखरोगघ्नः पानतः कामलापहः" ॥ * ॥
अथाश्चोतनविधिः ।
"क्वाथक्षीरद्रवस्नेहबिन्दूनां यत्त पातनं ।
द्व्यङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्चोतनञ्च तत् ॥
बिन्दवोऽष्टौ लेखनेषु रोपणे दशबिन्दवः ॥
स्नेहने द्वादश प्रोक्तास्ते शीते कोष्णरूपिणः ।
उष्णे तु शीतरूपाः स्युः सर्व्वत्रैवैष निश्चयः ॥
वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलं ।
कफे तिक्तोष्णरूक्षं स्यात् क्रमादाश्चोतनं हितं ॥
आश्चोतनानां सर्व्वेषां मात्रा स्याद्वाक्शतोन्मिता ।
ततः परं लोचनाभ्यां भेषजाय नयो मतः ॥
आश्चोतनं न कर्त्तव्यं निशायां केनचित् क्वचित्" ।
तद्यथा,—
"बिल्वादिपञ्चमूलेन बृहत्येरण्डशिग्रुभिः ।
क्वाथ आश्चोतने कोष्णो वाताभिष्यन्दनाशनः ॥
त्रिफलाश्चोतनं नेत्रे सर्व्वाभिष्यन्दनाशनं" ॥ * ॥
अथ पिण्डीविधिः ।
"उक्तभेषजकल्कस्य पिण्डी च कोलमात्रया ।
वस्त्रखण्डेन संबद्धाभिष्यन्दव्रणनाशिनी ॥
स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता ।
रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो बुधैरयं" ॥
सा यथा,—
"एरण्डपत्रमूलत्वग्भिर्निर्म्मिता वातनाशिनी ।
धात्री विरचिता पित्ते शिग्रुपत्रकृता कफे ॥
निम्बपत्रकृता पिण्डी पित्तश्लेष्महरी भवेत् ।
शुण्ठी निम्बदलैः पिण्डी सुखोष्णा स्वल्पसैन्धवा ॥
धार्य्या नेत्रेऽनिलश्लेष्मशोथकण्डूव्यथाहरी ।
त्रिफला पिण्डिका नेत्रे वातपित्तकफापहा" ॥
"पथ्याक्षामलखस्खसवस्कलकल्कोऽहिफेनजलयुक्तः ।
तेन विरचिता पिण्डी शमयति सकलानभिष्यन्दान्" ॥

इति भावप्रकाशः ॥
अभिष्यन्दिरमणं, क्ली, (अभिष्यन्दः प्रधाननगरस्यातिवृद्ध्या तत्सन्निधाने स्थापनं स एव विद्यतेऽत्र इति, रमतेऽत्र रम + आधारे ल्युट्, ततः कर्म्मधारयः ।) प्रधाननगरसन्निहितनगरं । तत्पर्य्यायः । शाखानगरं २ । इति जटाधरः ॥
अभिसन्तापः, पुं, (अभिसन्ताप्यतेऽत्र, अभि + सम् + तप् + णिच् + आधारे अच् ।) युद्धं । इति हलायुधः ॥
("जन्यं स्यादभिसन्तापः संमदो विग्रहस्तथा" ।
इति हलायुधः ।)
अभिसन्धानं, क्ली, (अभि + सम् + धा + भावे ल्युट् ।) वञ्चनं । प्रतारणं । इति हेमचन्द्रः ॥
("पराभिसन्धानपरं यद्यप्यस्य विचेष्टितं ।
जिगीषोरश्वमेधाय धर्म्म्यमेव बभूव तत्" ॥
इति रघुवंशे ।)
अभिसन्धिः, पुं, (अभिसन्धानं अभि + सम + धा + भावे किः ।) अभिसन्धानं । उद्देशः । यथा,—
"पितृन्नमस्ये दिवि ये च मूर्त्ताः,
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां,
विमुक्तिदा येऽनभिसंहितेषु" ॥
इति वह्निस्तवः ॥
("अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरं ।
स्वर्गाभिसन्धिसुकृतं वञ्चनामिव मेनिरे" ॥
इति कुमारसम्भवे ।)
अभिसम्पातः, पुं, (अभिसम्पात्यते योद्धा यत्र, अभि + सम् + पत् + आधारे घञ् ।) युद्धं । इत्यमरः ॥
अभिसरः, पुं, (आभिमुख्येन सरति, अभि + सृ + पचाद्यच् ।) सहायः । अनुचरः । इत्यमरः ॥
("राजा राज्यवर्द्धनं महासामन्तैः कृत्वा साभिसरम् उत्तरापथं प्राहिणोत्" । इति हर्षचरिते ।)
अभिसर्ज्जनं, क्ली, (अभि + सृज् + भावे ल्युट् ।) दानं । बधः । इति धरणी ॥
अभिसारः, पुं, (अभि + सृ + आधारे घञ् ।) बलं । युद्धं । सहायः । साधनं । इति धरणी ॥ स्त्रीपुंसयोरन्यतरस्यान्यतरार्थं सङ्केतस्थलगमनं । इत्यलङ्कारशास्त्रं ॥ ("रतिसुखसारे गतमभिसारे मदनमनोहरवेशं" । इति गीतगोविन्दे । "एवं कृताभिसाराणां पुंश्चलीनां विनोदने" । इति साहित्यदर्पणे ।)
अभिसारिका, स्त्री, (अभिसरति कान्तनिर्द्दिष्टसंकेतस्थानं गच्छति या, अभि + सृ + ण्वुल्, स्त्रियां टाप् ।) स्वीयादिषोड़शनायिकामध्ये अष्टावस्थाविशिष्टाष्टनायिकान्तर्गतनायिकाभेदः । अस्या लक्षणं । सङ्केतस्थले स्वयं गमनकर्त्री एवं प्रियगमनकारयित्री । अस्याश्चेष्टा । समयानुरूपभूषणं । शङ्का । बुद्धिनैपुण्यं । कपटसाहसादिः । सा त्रिविधा । दिवाभिसारिका १ ज्योत्स्नाभिसारिका २ अन्धकाराभिसारिका ३ । इति रसमञ्जरी ॥